त्रैमासिकी / डिसेम्बर् २०२२

# गीर्वाणपत्रिका

जयति जयति गीर्वाणी सरस्वती सुरसवती । सारस्वतजनमोहिनी संस्कृतसुविलासिनी ॥

पुण्या कनखले गङ्गा
कुरुक्षेत्रे सरस्वती ।
ग्रामे वा यदि वाऽरण्ये
पुण्या सर्वत्र नर्मदा ॥
त्रिभिः सारस्वतं पुण्यं
सप्ताहेन तु यामुनम् ।
सद्यः पुनाति गाङ्गेयं
दर्शनादेव नार्मदम् ॥



डिसेम्बर् २०२२

# अनुक्रमणिका


गुरूपदेशः १

निवेदनम् १

चिन्तनम् २

सुभाषितम् ३

मम नर्मदापरिक्रमा ४

बालरञ्जनी

कथा - व्याघ्रः वा मूषिकः वा ६

योजनक्रीडा ८

हास्यकणिका ८

योगविषये किञ्चित् ... ९

अस्माकं माता गृहम् आगता १०

रुचिरा ११

उपनिषद्विचारः १२

चायस्तोत्रम् १३

सारूप्यं खलु १३

## ॥ गुरूपदेशः ॥



दशमगुरु-परमपूज्य-
श्रीमत्-परिज्ञानाश्रम-स्वामिवर्यः ।

भवान् स्वभक्त्याः अभिव्यक्त्यर्थं भवतः गुरुवर्याणां पादुकापूजनं करोति | वस्तुतः गुरुवर्याणां पादुकापूजनस्य अर्थः अस्ति, भवतः हृदये तेषां सुप्रतिष्ठा करणीया, तेषु नितरां श्रद्धा स्थापनीया, स्वकर्मणां तेभ्यः समर्पणं करणीयं तथा तेषु सम्पूर्णः विश्वासः स्थापनीयः । ईदृशं पूजनं गुरुवर्यान् सर्वाधिकं सन्तोषयति ।



एकादशगुरु-परमपूज्य-
श्रीमत्-सद्योजातशङ्कराश्रम-स्वामिवर्यः ।

मन्त्रे गुरुशक्तिः निहिता अस्ति, मन्त्रे ईश्वरशक्तिः निहिता अस्ति तथा मन्त्रे आत्मशक्तिः अपि निहिता अस्ति । उपासनायां यदा भवान् स्वशरणागत्यां तीव्रताम् आनेतुं प्रयासं करोति तदा एषः आशयः ज्ञातव्यः । सा ईश्वरशक्तिः एव भवतः लक्ष्यं भवेत् या भवन्तं स्वंप्रति आकर्षति तथा सत्यं प्रस्फुटितं करोति ।

गुरूपदेशानुवादः - सङ्गीता पवार , मुम्बई

## निवेदनम्

ॐ श्रीगुरुभ्यो नमः । ॐ श्रीभवानीशङ्कराय नमः । ॐ श्रीमात्रे नमः ।

आनन्दमानन्दकरं प्रसन्नं ज्ञानस्वरूपं निजबोधयुक्तम् ।

योगीन्द्रमीड्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं नमामि ।।

कार्तिकशुक्लनवमीतिथिः अस्माकं सर्वेषां कृते मङ्गलमय-पवित्र-भाग्यशाली-दिवसः । इदम् अस्माकं परमपूज्य-सद्योजातशङ्कराश्रम-स्वामिगुरुवर्याणां जन्मदिनम् । अयम् अवसरः आसीत् तेषां सान्निध्यम् अनुभूय , तान् अस्माकं हृदयकमले संस्थाप्य , तेषाम् उपदेशान् अधिकाधिकं मनसि दृढीकृत्य , तेषां आराधनां कर्तुं , तान् प्रति कृतज्ञतां प्रकटीकर्तुं च ।

न तु केवलं सामाजिकस्तरे किन्तु वैयक्तिकस्तरे अपि प्रतिपदं मार्गदर्शनं कृत्वा सेवा-सत्सङ्ग-साधनाद्वारा अस्मान् सर्वान् आध्यात्मिकप्रगतिपथे अग्रे नयद्भ्यः गुरुवर्येभ्यः देशविदेशतः नैके साधकाः प्रीत्या श्रद्धया निष्ठया च श्रीगुरुपूजन-अनुष्ठानं समर्पितवन्तः ।

" गुरुः अधिगत-तत्त्वः । शिष्यहिताय उद्यतः सततम् । " इति श्रीमत्-आदिशङ्कराचार्यैः उक्तम् ।

गुरुः न केवलं व्यक्तिः किन्तु एका शक्तिः । प्रत्येकगुरोः व्यक्तिमत्वं भिन्नं किन्तु हेतुः एकमात्रः - शिष्यस्य मोक्षः । दीक्षितं शिष्यमोक्षार्थे.... श्लोकानुसारेण अस्मिन् असारसंसारे निमज्जितसाधकान् मोक्षं प्रति नेतुं निरन्तरं कटिबद्धः भवति गुरुः ।

साक्षात् श्रीदक्षिणामूर्तितः आरब्धगुरुशक्तेः स्रोतसः ' धृतशिवमयगात्रं साधकानुग्रहार्थम् ...' इति वचनानुसारम् अस्माकं कृते भूतले अवतरिताः अस्माकं गुरुवर्याः ।

अस्माकं मनसि स्थितम् अज्ञानान्धःकारं दूरीकृत्य , ईश्वरसान्निध्यं प्रापयतः परमपूज्य-गुरुवर्यान् हृत्पूर्वकं प्रणम्य वयम् इदं पत्रिकापुष्पं श्रीचरणकमलयोः सानन्दं समर्पयामः ।

– सम्पादिका

## चिन्तनम्

**- गौरी येन्नेमडी , मुम्बई**

अधोदत्तं सुभाषितम् अधिकृत्य गत- मार्च-मासे गीर्वाणप्रतिष्ठया चिन्तनम् आयोजितम् । अस्मिन् सहभागं गृहीतवद्भिः सदस्यैः प्रकटितानां स्वमतानां सारांशः -

ज्ञानं प्रधानं न तु कर्महीनम्

कर्मप्रधानं न तु बुद्धिहीनम् ।

तस्माद् द्वयोरेव भवेत् सुसिद्धिर्

न ह्येकपक्षो विहगः प्रयाति ॥

**अ) ज्ञानं प्रधानं न तु कर्महीनम् -**

अस्माकं जीवने ज्ञानस्य कर्मणः च प्राधान्यं समानम् । तयोः उपस्थितिः युगपत् आवश्यकी नो चेत् जीवनं गतिहीनं भवति । जीवनपथे प्रगतिः ताभ्यां विना असाध्या एव ।

किमर्थम् अत्र विहगस्य उपमा दत्ता ? यदि खगस्य द्वावपि पक्षौ सुस्थित्यां भवतः तदैव सः उत्तुङ्गम् उड्डयनं कर्तुं समर्थः । तस्य एकपक्षे छिन्ने सः डयने असमर्थः । पादाभ्यां सः चलितुं शक्नोति किन्तु उड्डयनमेव तस्य सामर्थ्यं सूचयति किल ? तथैव सफल- सुकर-जीवनस्य कृते ज्ञानकर्मयोः द्वयोः समानं महत्त्वं भवति ।

जीवने ज्ञानस्य महत्त्वम्-

जीवने किमपि कार्यं कर्तुं तस्य विषये ज्ञानम् आवश्यकम् । केवलं पुस्तकज्ञानं न पर्याप्तम् । तस्य धृति-अभ्यास-अभियोजन-एतेषामपि महत्त्वम् अस्ति । विना अभियोजनं धृतिः न भवति । ज्ञानं दृढं न भवति । एतत्तु जीवनस्य प्रथमभागे कर्तव्यम् । जीवनस्य उर्वरितभागे यदा लक्ष्यं मोक्षं प्रति गन्तव्यं तदा आध्यात्मिक-ज्ञानस्य आवश्यकता अनुभूयते , अतः " ज्ञानादेव तु कैवल्यम् " इति उच्यते । तस्यां स्थित्यामपि कर्मणः आवश्यकता अस्ति । ज्ञानमाध्यमेन कर्मणः कर्मयोगे परिवर्तनं भवति । अन्यथा तस्य ज्ञानस्य अवक्षयः निश्चितः एव । अतः ज्ञानप्राप्त्याः प्रत्येकस्तरे एतद् अवधानं भवेत् ।

**(आ) कर्मणः महत्त्वम् -**

' कर्मप्रधानं न तु बुद्धिहीनम् ' इत्युक्ते कर्म तु महत्वपूर्णम् अस्ति एव किन्तु तत् बुद्धिहीनं मा भवेत् । उत्तमकर्म बुद्धियोजनया एव भवति । नैके वैज्ञानिकाः नूतनाविष्कारान् कुर्वन्ति किन्तु तेषाम् अभियोजनं बुद्धिसाहाय्येनैव भवितुं शक्यते । अतः ईदृशं ज्ञानकर्मयोः समतोलत्वं साधयितव्यं नो चेत् जीवनं दोलायमानं भवति । एते द्वे अपि परस्परपूरके । कार्यस्य हेतुः उत्तमः भवेत् , प्रयत्नाः न केवलम् अविश्रान्ताः किन्तु बुद्ध्या प्रेरिताः भवेयुः , ईश्वरार्पणभावेन भवेयुः । ईश्वरः एव कारयिता । अतः कर्मणः प्रत्येकस्तरे एतद् अवधानं भवेत् । कार्यस्य परिणामं ज्ञात्वा कार्यं करणीयम् । पुस्तकीयज्ञानात् प्रात्यक्षिकज्ञानं श्रेष्ठम् । पुस्तकीयज्ञानं तु प्रथमसोपानं किन्तु यत् अस्मान् लक्ष्यं प्रति नयति तत्तु प्रात्यक्षिकज्ञानमेव । अत्र अन्यः पर्यायः एव नास्ति । कर्मणः प्राप्तः स्वानुभवः एव श्रेष्ठः अस्ति ।

यथा सुदृढशरीरस्य कृते व्यायामः आवश्यकः तथैव मस्तिष्कस्य कृते ज्ञानप्राप्तिः आवश्यकी । एते द्वे अपि जीवनरथस्य द्वे चक्रे इव ।

एवं ज्ञानकर्मभ्याम् एव अस्माकं जीवनं सफलीभवितुं शक्यते ।

## सुभाषितम्

**- गीता खानोलकर , मुम्बई**

**निर्वाणदीपे किमु तैलदानम्**

**चौरे गते वा किमु सावधानम् ।**

**वयोगते का खलु मल्लविद्या**

**पयोगते कः खलु सेतुबन्धः ।।**

**भावार्थः -**

निर्वापिते दीपे योजितं तैलं पुनः तं प्रज्वालयितुं न शक्नोति । चौर्यकर्म कृत्वा चोरस्य पलायनात् अनन्तरं यदि मनुष्यः जागरितः भवति तर्हि तेन किं प्रयोजनम् ? वार्धक्ये शरीरसंवर्धनस्य कृते मल्लविद्या न उचिता । तथा निर्गते जले सेतुबन्धस्य निर्मितिः अयोग्या एव ।

योग्यसमये कृतं सुप्रयुक्त-कार्यम् एव सफलं भवति ।

# मम नर्मदापरिक्रमा

- सुमन नागरकट्टी , पुण्यनगरी

केभ्यश्चित् वर्षेभ्यः पूर्वम् एका परिचिता महिला माम् उक्तवती यत् सा पादाभ्यां नर्मदायाः परिक्रमां कृतवती । तस्याः अनुभवान् श्रुत्वा मनसि कौतूहलं जागृतम् । अन्ते सा उक्तवती जीवने एकवारं तु परिक्रमा करणीया एव । तत् तु मम कृते असम्भवम् इति मत्वा अहं विस्मृतवती ।

एतस्मिन् वर्षारम्भे अन्येका भगिनी पृष्टवती " ट्रॅव्हल्स" द्वारा आयोजित-परिक्रमा-यात्रार्थं गमिष्यावः वा?" वाहनद्वारा आयोजितास्ति इति श्रुत्वा मम कृते सम्भवम् इति मत्वा अहम् अचिरात् अनुमतिं दत्तवती ।

यात्रायाः पूर्वमेव आयोजकः बोधितवान् यत् -

- एषा यात्रा सुखदयात्रा नास्ति परन्तु उपासना यात्रा अस्ति । मार्गे नैकाः असुविधाः भवितुं शक्यन्ते परन्तु श्रद्धया परिक्रमा करणीया ।
- प्रतिदिनं २०० -२५० कि .मि . मिता यात्रा अस्ति तथैव सम्पूर्णः २८०० कि.मि. मितः मार्गः महाराष्ट्र-गुजरात-मध्यप्रदेशतः गच्छति ।
- गङ्गा-यमुना-सरस्वत्यादयः सर्वाः नद्यः पूजनीयाः एव । परन्तु परिक्रमा केवलं नर्मदायाः एव भवति । एषा 'शिवपुत्री' इति मन्यते । एतया परिक्रमया कोटि-शिवलिङ्गानां परिक्रमासमा पुण्यप्राप्तिः भवति इति धारणा । नदीतीरे नैके लिङ्गाकाराः पाषाणखण्डाः दृश्यन्ते । कोऽपि तान् आनीय गृहे पूजां कर्तुं शक्नोति । प्राणप्रतिष्ठायाः आवश्यकता नास्ति इत्यपि उक्तं तेन । परिक्रमायाः आद्यप्रवर्तकः मार्कण्डेयः मुनिः अस्ति । अन्ये नैके ऋषिमुनयः अपि एतां यात्रां कृतवन्तः। परमपूज्य-आदिशङ्कराचार्यः एतां यात्रां कृत्वा नर्मदाष्टकम् इति स्तोत्रं रचितवान् । सर्वे नर्मदानदीं 'माता', 'देवी' इति सम्बोधयन्ति ।
- भारतस्य मध्यभागे स्थितायाः विन्ध्याचलपर्वत-शृङ्खलायाः मेकलपर्वतात् अमरकण्टकग्रामे नर्मदा उद्भवति । ततः १४०० कि.मि. पर्यन्तं पश्चिमदिशि वहति तथा गुजरातराज्यस्य भडोच स्थाने सिन्धुसागरं मिलति च ।
- ओङ्कारेश्वरतः यात्रारम्भः भवति । सम्पूर्णा यात्रा नद्याः वामतः भवति। कुत्रापि नद्याः उल्लङ्घनं न भवति। नद्याः उत्तरदिशि यात्रारम्भं कृत्वा उगमस्थानम् अमरकण्टकं प्राप्य अग्रे सागरसङ्गमपर्यन्तं गत्वा नद्याः दक्षिणदिशि पुनः यदा यात्रिकः ओङ्कारेश्वरं प्राप्नोति तदा परिक्रमा सम्पूर्णा भवति ।



उपरोक्त-परिचयकरणोपरान्तम् आयोजकः अस्मभ्यम् एकां लघुकूपीं, नर्मदा-देव्याः छायाचित्रं तथा 'नर्मदाष्टकम्' इति आरतीपुस्तिकां च दत्त्वा कुमारिकापूजनसामग्रीम् आनेतुम् उक्तवान् ।

यात्रारम्भः -

पुणेतः ३० यात्रिकाः रेलयानेन उज्जयिनी-नगरीं प्राप्य अग्रे ओङ्कारेश्वरं गतवन्तः । अपरेद्युः वयं यात्रिकाः नदीतीरं गतवन्तः । नद्यां स्नात्वा कूप्यां जलं पूरयित्वा तीरे उपविश्य

पुरतः कूपीं देव्याः छायाचित्रं च स्थापयित्वा उपस्थितवैदिकस्य आदेशानुसारं वयं पूजारतीं कृतवन्तः नर्मदाष्टकम् गीतवन्तः च । तदनन्तरं निवासस्थानम् आगत्य सायं पुनरपि पूजारतीपठनं कृतवन्तः। एषः क्रमः प्रतिदिनं प्राचलत् ।

अस्माकं यात्रारम्भः प्रातः भवति स्म । अग्रिमस्थानं प्राप्तुं वाहनेन वा पादाभ्यां गमनं भवति स्म । प्रतिदिनं नूतनं निवासस्थानम् आसीत् । यात्रायाः चतुर्दशदिने प्रातः पुनः ओङ्कारेश्वरम्प्राप्य नदीस्नान-पूजा-दिनचर्यां समाप्य सङ्कल्पपूर्तिः अभवत् । सायं शिवपार्वतीगणेशानां तथा अस्माकं पितृजनानां विशेषरूपेण विजृम्भणेन वयं पूजां कृतवन्तः। पापक्षालन-क्षमायाचनार्थे च एषा पूजा आसीत् । यात्रायां ' नर्मदे हर ' इति पञ्चाक्षरी - मन्त्रस्य जपं वारं वारं सर्वे कृतवन्तः । परस्परसम्बोधनार्थम् अपि उपयुज्यन्ते ' नर्मदे हर ' इति ।



मार्गे ओङ्कारेश्वरः , नारेश्वरः , गरुडेश्वरः इत्यादीनि नैकानि मन्दिराणि सन्ति । अन्यान्यपि प्रेक्षणीयस्थानानि सन्ति - माहेश्वरस्थितः राज्ञी - अहिल्याबाई - होळकरस्य प्रासादः, रानी - रूपमतीमहलादयः ।

एषा यात्रा सामान्यतया न साध्या । सा तु केवलं दैवीयोजना अस्ति इति सर्वे मन्यन्ते ।

नर्मदादेव्याः गरिमा -

पुण्या कनखले गङ्गा कुरुक्षेत्रे सरस्वती ।
ग्रामे वा यदि वाऽरण्ये पुण्या सर्वत्र नर्मदा ॥
त्रिभिः सारस्वतं पुण्यं सप्ताहेन तु यामुनम् ।
सद्यः पुनाति गाङ्गेयं दर्शनादेव नार्मदम् ॥

पदयात्रां कुर्वतां यात्रिणां कृते स्थानिक-जनानां मनसि विशेषश्रद्धा भवति । तेषां कृते कोऽपि स्वस्य गृहे स्थानं, भोजनं च यथाशक्ति स्वेच्छया विनामूल्यमपि ददाति इति स्वानुभवम् एका महिला उक्तवती ।

यात्रायां घटिता एका घटना -

लोकयानेन यात्रा चलन्ती आसीत् । अस्मासु एकः यात्रिकः अकस्मात् दूरभाषासन्देशं प्राप्तवान् यत् ' भवतः मार्गे पतितां पेटिकाम् आनयामि, प्रतीक्षां करोतु ' इति । यानं तत्क्षणं स्थगितम् । यात्रिकैः लक्षितं यत् यानस्य पेटिका-स्थान-द्वारम् उद्घाटितमासीत् । तस्मात् केवलम् एका पेटिका एव पतितासीत् । आश्चर्यं किल ! ततः परं केवलं तस्याः उपरि महोदयस्य नाम-स्थान-दूरभाषाक्रमाङ्कं लिखितम् आसीत् । अन्यपेटिकायाः अपि पतनं शक्यमासीत् । अन्यस्याः कस्याः उपरि दूरभाषाक्रमाङ्कः अपि नासीत् । एषः तु एकः चमत्कारः तथा देव्याः कृपा इति सर्वे उक्तवन्तः।

पादयात्रा कृतवत्योः महिलयोः अन्येकः अनुभवः -

एते महिले वनमार्गेण गतवत्यौ आस्ताम् । सायमासीत् । शीघ्रं किमपि स्थानं प्राप्तव्यम् आसीत् । परन्तु पुरतः द्वौ मार्गौ दृष्ट्वा केन मार्गेण गन्तव्यम् इति सम्भ्रमेण भयवशात् देव्याः जपम् आरब्धवत्यौ । कस्यचित् समयस्य अनन्तरम् एकः शुनकः तत्र आगतवान् । ते दृष्ट्वा अग्रे एकेन मार्गेण गन्तुम् सः शुनकः आरब्धवान् । महिले तं प्रति प्रथमं दुर्लक्ष्यं कृतवत्यौ । परन्तु तत्र सः स्थित्वा ते प्रति दृष्ट्वा पुनः अग्रे गतवान् । तदा ते 'एषः शुनकः देव्याप्रेषित-मार्गदर्शकः भवितुं शक्यते' इति मत्वा तम् अनुसृत्य गतवत्यौ । सत्यमेव । समयानन्तरं दूरे दीपान् दृष्टवत्यौ । तस्यां दिशि गतवत्यौ ते विस्मिते यत् शुनकः कदा कुत्र अदृश्यः अभवत् एतत् ताभ्यां न ज्ञातम्।

बालरञ्जनी

## व्याघ्रः वा मूषिकः वा ।

**मूलकथा - कै. पञ्जे मङ्गेशराय**
**अनुवादः - सुधा भट कल्याणपुर , मङ्गलूरु**

एकस्मिन् ग्रामे एकः मान्त्रिकः आसीत् । सः करतले किञ्चित् भस्म स्थापयित्वा मन्त्रोच्चारणेन यदि फुत्करोति तर्हि पुरतः स्थितः अन्धः द्रष्टुं शक्नोति स्म, बधिरः श्रोतुं शक्नोति स्म , मूकः वक्तुं शक्नोति स्म , पङ्गुः धावितुं शक्नोति स्म । वृद्धानाम् उपरि यदि सः भस्म फुत्करोति तर्हि ते सर्वे बालाः इव हसन्ति स्म , बालानाम् उपरि यदि भस्म फुत्करोति तर्हि ते वृद्धाः इव कासन्ते स्म । सः मान्त्रिकः तु महान् एव ।

एकस्मिन् दिने एषः मान्त्रिकः तस्य गृहस्य पुरतः उपविश्य मन्त्रोच्चारणेन भस्म सिद्धं कुर्वन् आसीत् । तदा एकः मूषिकः ''चिलिमिलि - चिलिमिलि..." इति शब्दैः क्रन्दन् तस्य पादतले अपतत् । मान्त्रिकः तं पृष्टवान्, " किं जातम्? अत्र किमर्थम् आगतवान् ?"

मूषिकः उक्तवान्,

" मार्जारः माम् अनुधावन् अस्ति।
मां बहु पीडयन् अस्ति ।
मम अपेक्षया बलवत्तरः मार्जारः ।
भयभीतः अहं तु तस्य पुरतः ।
माजरि कृपया मां परिवर्तयतु
स्वामिन् मम प्राणरक्षणं करोतु । "

मान्त्रिकः तस्य प्रार्थनां श्रुत्वा किञ्चित् भस्म गृहीत्वा मन्त्रोच्चारणं कृत्वा तस्य उपरि फुत्कारितवान् । ओह् ! तत्क्षणम् एव मूषिकः मार्जारः अभवत् तथा सन्तोषेण म्यांव् - म्यांव् कुर्वन् बहिः अधावत् ।

मार्जारस्य 'म्यांव् - म्यांव्' शब्दं श्रुत्वा एकः शुनकः तस्य पृष्ठे अधावत् । अधुना भयभीतः मार्जारः कथञ्चित् पुनः मान्त्रिकं प्राप्तवान् ।

मान्त्रिकम् उक्तवान् ,

" शुनकः माम् अनुधावन् अस्ति।
मां बहु पीडयन् अस्ति ।
मम अपेक्षया बलवत्तरः शुनकः।
भयभीतः अहं तु तस्य पुरतः ।
शुनके कृपया मां परिवर्तयतु
स्वामिन् मम प्राणरक्षणं करोतु । "

मान्त्रिकः पुनः मन्त्रोच्चारणं कृत्वा किञ्चित् भस्म तस्य उपरि फुत्कारितवान् । ओह् ! तत्क्षणम् एव मार्जारः शुनकः अभवत् । सः सन्तोषेण 'भौ- भौ ' कुर्वन् बहिः अधावत् ।

शुनकस्य 'भौ- भौ ' श्रुत्वा एका धेनुः तस्य खेटनं कर्तुं प्रारम्भं कृतवती। । भीतः शुनकः कथञ्चित् पुनश्च मान्त्रिकं प्रति धावितवान् ।

तं प्रार्थितवान् ,

" धेनुः माम् अनुधावन्ती अस्ति।
मां बहु पीडयन्ती अस्ति ।
मम अपेक्षया बलवत्तरा धेनुः ।
तस्याः पुरतः भयभीतः अहं तु ।
धेन्वां कृपया मां परिवर्तयतु
स्वामिन् मम प्राणरक्षणं करोतु । "

मान्त्रिकः तस्य प्रार्थनां श्रुत्वा पुनः किञ्चित् भस्म मन्त्रोच्चारणं कृत्वा तस्य उपरि फुत्कारितवान् । तत्क्षणम् एव शुनकः धेनुः अभवत् । सा आनन्देन हम्भारवं कुर्वती बहिः अधावत् ।

धेनोः हम्भारवं श्रुत्वा एकः व्याघ्रः तत्र आगतवान् । धेनुं खादितुं तस्याः उपरि प्लुतवान् । धेनुः कथञ्चित्



दया बाळे कोप्पिकर, न्यू जर्सी

व्याघ्रस्य आक्रमणात् पलायनं कृत्वा मान्त्रिकं प्रति गत्वा उक्तवती,

" व्याघ्रः माम् अनुधावन् अस्ति ।
माम् हन्तुम् इच्छन् अस्ति ।
मम अपेक्षया बलवत्तरः व्याघ्रः ।
भयभीता अहं तु तस्य पुरतः ।
व्याघ्रे कृपया मां परिवर्तयतु
स्वामिन् मम प्राणरक्षणं करोतु । "

मान्त्रिकः तस्य प्रार्थनां श्रुत्वा मन्त्रोच्चारणं कृत्वा किञ्चित् भस्म तस्य उपरि फुत्कारितवान् । तत्क्षणम् एव धेनुः व्याघ्रः अभवत् । अधुना सः परिवर्तित-व्याघ्रः अत्र तत्र पश्यन्, दन्तान् प्रदर्शयन्, पुच्छं यथा तथा परिवृत्य, स्वनखान् दर्शयन् , उच्चैः अगर्जयत् , " अहम् अतीव बुभुक्षितः अस्मि ।

साम्प्रतं तु त्वाम् एव खादामि । "

किन्तु मान्त्रिकः किञ्चित् अपि भयभीतः न जातः। सः उच्चैः पृष्टवान् ," त्वं व्याघ्रः वा मूषिकः ? त्वयि अधुना बलम् आगतम् अतः अहङ्कारं प्रदर्शयसि किम् ? मम अपेक्षया बलवत्तरः जातः किम् ? किञ्चित् तिष्ठ । सम्यक् शिक्षादण्डनं दास्यामि ।"

इति उक्त्वा मुष्टिपूर्णं भस्म गृहीत्वा मन्त्रोच्चारणं कृतवान् । तदनन्तरं " यथा पूर्वं कल्पयेत् , यथा पूर्वं कल्पयेत् , यथा पूर्वं कल्पयेत् " इति त्रिवारम् उक्त्वा व्याघ्रस्य उपरि क्षिप्तवान् ।

ओह् ! तत्क्षणम् एव व्याघ्रः मूषिकः अभवत् , चूं-चूं शब्दं कुर्वन् बहिः अधावत् ।

भोः मम प्रिय बालकाः , मान्त्रिकस्य रक्षणं तु मन्त्रेण एव अभवत् । किन्तु सः मन्त्रः अतीव गोपनीयः । अहम् अपि तं मन्त्रं न जानामि ।



**कै. पञ्जे-मङ्गेशरायस्य** जन्म चित्रापुर-सारस्वत-कुटुम्बे १८७४ तमे वर्षे बण्टवाल्-ग्रामे जातम् । तस्य मातृपित्रोः नामनी सीतम्मा रामप्पय्या च आस्ताम् । मङ्गेशरायस्य विद्याभ्यासः बण्टवाल-मङ्गलूरु-मद्रासनगरेषु पूर्णः अभवत् । सः स्वचरितं कन्नड-अध्यापन-वृत्त्या प्रारभ्य शाला-निरीक्षकः (इन्सपेक्टर ऑफ् स्कूल्स) इति पदात् निवृत्तः जातः । तस्य रुचिः साहित्य-क्षेत्रे अधिका आसीत् । सः नवोदय-कन्नड-लेखकेषु अग्रेसरः इति मन्यते ।

तस्य कथा-कविता-प्रबन्धादि-साहित्यकृतयः कन्नडभाषायां तथा कोङ्कणीभाषायाम् अपि वर्तन्ते । तेन लिखिता ' नन्न चिक्कताइय उइल् ' (मम मातृस्वसुः मृत्युपत्रम् ) नाम्नी कथा कन्नडभाषायाम् अग्रणीलघुकथा इति प्रख्याता ।

१९३४ तमे वर्षे रायचूरनगरे आयोजिते अखिलभारत-कन्नड-साहित्यसम्मेलने तस्य अध्यक्षपदस्य कृते चयनं भूत्वा सः अभिसत्कृतः । सः १९३७ तमे वर्षे दिवङ्गतः ।

पञ्जे-मङ्गेशरायस्य जन्मशताब्देः १९७४ तमे वर्षे वैभवेन आचरणं जातम् । तस्मिन् समये तस्य जन्मस्थाने एकं स्मारकं तथा मङ्गलूरुनगरस्य एकस्य प्रमुखमार्गस्य ' पञ्जे-मङ्गेशराय-मार्गः ( PMR Road ) ' इति नामकरणम् जातम् ।

## योजन-क्रीडा

**कामाक्षी बैन्दुर , बेङ्गलूरु**

### पशु-ध्वन्योः योजनं करोतु-












| पशवः | पशुध्वनयः |
|---|---|
| १) मूषिकः | अ) विरौति |
| २) शुनकः | आ) आवते |
| ३) मार्जारः | इ) हम्भायते |
| ४) वानरः | ई) हिक्कते |
| ५) भेकः | उ) म्याकरोति |
| ६) व्याघ्रः | ऊ) द्रुपते |
| ७) धेनुः | ए) किचकिचायते |
| ८) अजः | ऐ) गर्जति |
| ९) हरिणः | ओ) रटति |
| १०) वृषभः | औ) भषते |

चित्राणि - सुधा कार्नाड , बेङ्गलूरु

उत्तराणि अन्तिम-पृष्ठे दत्तानि

## हास्यकणिका



**- सुजाता हळदीपुर , मुम्बई**

याचकः - अम्ब ! भोजनार्थं किमपि इच्छामि ।

गृहिणी - भोजनार्थं किञ्चित् विलम्बः अस्ति । पोलिकाः अपि अधुना न सिद्धाः । किञ्चित् प्रतीक्षां कुरु ।

याचकः - प्रतीक्षा ? मम समीपे समयः नास्ति भोः ! भवती एकं कार्यं करोतु । पोलिकाः यदा सिद्धाः भवन्ति तदा वॉटसॅपद्वारा सन्देशं प्रेषयतु । अहं सत्वरम् त्रिचक्रिकया आगमिष्यामि ।

गृहिणी (क्रोधेन) - तस्य किञ्चिदपि आवश्यकता नास्ति । न आगन्तव्यम् । पोलिकायाः चित्रं वॉटसॅपद्वारा एव प्रेषयिष्यामि । हं, प्रचुरमात्रया घृतं स्थापयितुं न विस्मरिष्यामि ।

# योगविषये किञ्चित् ...

**लेखः – मीनाक्षी बलजेकर , ठाणे**
**अनुवादः – वैशाली कोप्पीकर , मुम्बई**

## सर्वाङ्गासनम्

### विधिः

एतदासनार्थम् अस्माभिः प्रथमम् उत्तानशयनं ( lying on the back) करणीयम् । हस्तद्वयं शरीरस्य निकटे स्यात् तथा च पादद्वयं परस्परं श्लिष्टं स्यात् । उदरस्य स्नायून् अन्तः समाकृष्य श्लिष्टौ पादौ उपरि उन्नयनीयौ। अनन्तरं पूर्णमेरुदण्डः उपरि नयनीयः । हस्तद्वयेन कट्यै आधारः दातव्यः । प्रायः सम्पूर्णशरीरस्य समलम्बकोनाकृतिः भवेत् इति प्रयत्नः करणीयः। एतस्यामेव स्थितौ यावत्शक्यं तावत् स्थातुम् अभ्यासः करणीयः।

### सर्वाङ्गासनस्य लाभाः -

१) शरीरस्य सर्वेषाम् अवयवानां कृते एतदासनं लाभदायकं वर्तते , विशेषतः स्त्रीणां कृते ।

२) पृष्ठसम्बन्धिनः समस्याः वा गर्भाशयविकारादयः वा एतेन आसनेन नियन्त्रयितुं शक्यन्ते ।

३) काकलसम्बन्धित-विकाराः न्यूनाः भवन्ति ।



### विशेष-सूचना -

येषु ग्रीवादोषः वर्तते तैः वैद्यानां निर्देशानुसारं योगज्ञस्य पुरतः एव एतदासनं करणीयम् । रजस्वला-महिलाभिः एतदासनं न करणीयम्।

# अस्माकं माता गृहम् आगता...

**- ललिता अमलाडी , पुण्यनगरी**



अहं कोल्लूर-मूकाम्बिकायाः विषये एकां रमणीयां परं सत्यकथां कथयितुमिच्छामि, या मम कृते अतीव प्रिया अस्ति।

प्रायः ३०० वर्षपूर्वं घटिता एषा घटना । पुरातनकाले एकं विशेषं पात्रं भवति स्म यस्मिन् शिशूनां कृते लाजपेया( अन्नोदकं ) पच्यते स्म । पात्रे उपयोक्तुम् एका अयोदर्विः (लघुदण्डः) अपि भूयते स्म । मम प्रपितामहस्य गृहे अपि ईदृशं पात्रम् आसीत्।

कालक्रमेण पात्रे छिद्रम् अभवत् । पात्रस्य समीकरणार्थं मम प्रपितामहः एकं लोहकारम् आहूतवान् , तम् उक्तवान् एतत् पात्रं सम्यक् कृत्वा शीघ्रं ददातु इति।

यदा लोहकारः पात्रस्योपरि कार्यं कर्तुम् आरब्धवान् तदा सः पात्रे एकं मुखं, नेत्रद्वयं कर्णौ च दृष्टवान् । किम् अभवत् इति सः ज्ञातुं न शक्तवान् । तेन कार्यं तत्रैव स्थगितम् । परं पुनः यदा सः कार्यम् आरब्धवान् तदा सः तदेव दृश्यं दृष्टवान् । आश्चर्यं तथा भयम् अनुभूय सः निद्रामपि कर्तुं न शक्तवान् । सः चिन्तितवान् यत् श्वः एव पात्रस्य स्वामिनं मिलित्वा सर्वं वक्तव्यम् ।

तस्मिन् दिवसे एव मम प्रपितामहेन एकं सुन्दरं स्वप्नं दृष्टम् । स्वप्ने कोल्लूर- मूकाम्बिका प्रकटिता। सा उक्तवती यत् सा सवनाल-कुटुम्बस्य जनैः सह उषितुम् इच्छति अतः तस्यै स्वीकरणीयम् । एवम् उक्त्वा सा अन्तर्धाना भूता ।

प्रातःकाले लोहकारः सवनाल-कुटुम्बस्य गृहम् आगत्य मम प्रपितामहं पात्रस्य घटनायाः विषये सर्वम् उक्तवान् । मम प्रपितामहः तत्क्षणं ज्ञातुं शक्तवान् यत् पात्रे प्रकटितं मुखं देव्याः एव आसीत् इति। अतः सः लोहकारम् उक्तवान् ," चिन्ता मास्तु, पात्रं प्रतिददातु " इति । लोहकारतः पात्रं भक्त्या हर्षोल्लासेन स्वीकृत्य मम प्रपितामहः देवीमुखपात्रं स्वगृहे देवमण्टपे स्थापितवान् । परं तत् पात्रं दण्डेन सह कथं सम्यक् स्थापयितुं शक्यते इति चिन्तयन् आसीत् । तदा एव तत्र एकः भिक्षुकः आगतवान् । भिक्षुकस्य हस्ते एकं दीर्घं पात्रम् आसीत् । तत् दृष्ट्वा मम प्रपितामहः तस्मात् तं पात्रं याचितवान् । तस्मिन् पात्रे यदा दण्डं स्थापितवान् तदा देवीमुखपात्रं सम्यक् स्थिरं भूतम् । भिक्षुकाय धनं , नारिकेलफलादीनि दत्तवान् । ईदृशम् अस्माकं प्रपितामहस्य गृहे मूकाम्बिका-देव्याः आगमनम् अभवत् ।

ततः प्रतिदिनं देवीपूजनं भवति स्म । कालक्रमेण पित्रा देव्याः कृते रजत-शाटिका, मुखं, कवचम् इत्यादीनि अलङ्काराणि रचितानि ।

मम जनकः सवनाल भवानीशङ्करः ६२ वर्षेभ्यः अधिकं कालं स्वगृहे स्थापितदेव्याः भक्त्या पूजां कुर्वन् आसीत् । देव्याः सर्वेषाम् उत्सवानामपि आचरणं भवद् आसीत् । गतवर्षतः अस्माकं सर्वाः कुटुम्बदेवताः शिराली मठे सन्ति । गुरुवर्याणाम् आशीर्वादेनैव एतत् सर्वं शक्यम् अभवत् ।

रुचिरा

# शिग्रुपत्राणां भर्जकानि

**– पाककृतिः - काञ्चन मण्णिगे**

**– अनुवादः - श्रीकला कौशिक**




**अपेक्षिताः सामग्र्यः -**

१) शिग्रुपत्राणि (drumstick leaves) - आवश्यकतानुसारम् ।

२) तण्डुलाः - अर्धचषकपरिमिताः ।

३) द्विदलम् - अर्धचषकपरिमितम् ।

४) आघर्षितनारिकेलः - ३/४ चषकपरिमितः ।

५) तिन्त्रिणी - स्वादानुसारम् ।

६) गुडः - आवश्यकतानुसारम् ।

७) रक्तमरीचिका - ६/७

८) हरिद्रा - चमसमात्रम् ।

९) हिङ्गुः - स्वादानुसारम् ।

१०) लवणं - स्वादानुसारम् ।

११) भर्जनार्थं तैलं, रन्ध्रदर्वी

**कृतिः -**

समीचीनतया प्रक्षाल्य शुष्कीकृत्य शिग्रुपत्राणां कर्तनं करणीयम् । होरा-चतुष्टयं यावत् जले निमज्ज्य शोषितौ तण्डुलद्विदलौ मिश्रणपात्रे संस्थाप्य तस्मिन् आघर्षितं नारिकेलं, गुडं , तिन्त्रिणीं , रक्तमरीचिकां च निक्षिप्य पेषणचूर्णं वा पिष्टं करणीयम् । कर्तितेषु शिग्रुपत्रेषु लवणं हिङ्गुं पिष्टचूर्णं च संस्थाप्य लघु-वटकानि कृत्वा मन्दाग्नौ तप्ततैले भर्जनं करणीयम् ।

वर्षर्तुसमये तिन्त्रिण्युपसेचनेन सह भर्जकखादनं तु तेजस्करम् ।

शिग्रुपत्राणाम् ओषधिगुणाः -

शिग्रुपत्रशाकं रुच्यं वातकफापहम् ।<br>
कटूष्णं दीपनं च कृमिघ्नं पाचनं परम् ॥

## सूक्तिः

मनस्वी कार्यार्थी<br>
न गणयति दुःखं<br>
न च सुखम् ।

# उपनिषद्विचारः

**– कृष्णानन्द मङ्कीकर , मुम्बई**

गीर्वाणपत्रिकायाः प्रस्तुतसंस्करणादारभ्य, आगामिनि संस्करणेषु वयम् उपनिषद्विषये किञ्चित् विचारं करिष्यामः। उपनिषद्विचारः अतीवः गहनः एव । किन्तु, वयम् एकं गवाक्षम् उद्घाटयामः यस्मात् गवाक्षात् यत्किञ्चित् दृष्टिपथम् आगच्छति तदनुभूय वाचकाः एतस्मिन् विषये अधिकतरां रुचिं प्राप्नुयुः इत्यपेक्षा । वयम् अस्माकं गुरून् उद्दिश्य स्तुमः " ईश्वरान् वेद-वेदाङ्ग-वेदान्त ज्ञानिनां धुरि " इति । इत्यत्र वेदाः चत्वारः, वेदाङ्गानि षट्, तथा 'वेदान्त' इत्यनेन शब्देन उपनिषदः अभिधीयन्ते । उपनिषदः वेदानामन्ते ग्रथिताः तस्माद्वेदान्त इति नाम । उपनिषत् इत्यस्य विवरणम् " उप + नि + सद् " 'समीपे उपविश' इति । अन्तेवासिनः (शिष्याः) गुरुवर्याणां समीपम् उपविशन्तः ज्ञानं गृह्णन्ति स्म । अत्र उपनिषदि यज्ज्ञानम् प्रतिपादितं तस्य विचारः तथा समीचीनं ग्रहणं गुरोः उपदेशेन विना अशक्यम् इति भावः ।

किंविधं ज्ञानम् उपनिषदि ? वेदेषु प्रायः कर्मविषयकं विवेचनम् । उपनिषदि तु आत्म-परमात्मयोः परस्परसम्बन्धविषयः परिचर्चितः। आत्मैव परमात्मा इति प्रतिपादितम् । "तत्त्वमसि", "अहं ब्रह्मास्मि", "अयमात्मा ब्रह्म", तथा "प्रज्ञानं ब्रह्म" इति चत्वारि महावाक्यानि उपनिषदि उक्तानि। " ...एते मन्त्राः आत्मनो याथात्म्य-प्रकाशनेन आत्मविषयकं स्वाभाविकम् अज्ञानं निवर्तयन्तः..." इति भगवत्पादवचनम् ईशावास्योपनिषद्भाष्ये कृतमस्ति यत् अन्योपनिषद्विषयेऽपि यथार्थत्वेन द्रष्टव्यम् । " नायमात्मा बलहीनेन लभ्यो" इति मुण्डकोपनिषदि तथा च कठोपनिषदि "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्" । इति अनेकानि वचनानि औपनिषदिकानि । "न हि ज्ञानेन सदृशं पवित्रमिह विद्यते" इत्युक्तं भगवता गीतायाम् । तथैव कथमिदं ज्ञानं प्राप्तव्यम् अस्माभिः इत्यस्य समीचीनः ऊहापोहः कृतः उपनिषदि । वेदाः प्राचीनाः किल । तथैव उपनिषदः । कालान्तरेण उपनिषदि विवक्षितः विषयः कठिनः तथा भाषा अपि क्लिष्टा अभूत् । एतस्य समाधानार्थं भगवत्पादादिभिः मुनिवर्यैः भाष्यग्रन्थाः रचिताः । अधुनापि अर्वाचीनाः विद्वांसः उपनिषन्मीमांसायां प्रवीणाः अर्थान् विविधतया प्रकटीकुर्वन्ति ।

कर्म कर्तव्यसिद्धं, भक्तिः भगवत्तुष्ट्यर्थमेको मोक्षोपायः, किन्तु ज्ञानं तु उभयोः पुष्ट्यर्थमिति विचार्य, कर्मभक्तिज्ञानत्रयीमार्गेण मुमुक्षुभिः ध्येयसिद्धिः कर्तव्या ।

मुक्तिकोपनिषदि १०८ उपनिषदः निगदिताः । तासामपि १० उपनिषदामुपरि (केचित् ११ इति वदन्ति), भगवत्पादैः भाष्यरूपेण व्याख्या कृता । भगवत्पादानां भाष्यनिर्वचनं मुमुक्षुभिः यथाशक्ति पठितव्यम्, अभ्यासितव्यं निदिध्यासितव्यं च ।

गीर्वाणपत्रिकायाः आगामिनिसंस्करणेषु, केषुचित् मुख्योपनिषत्सु विवृतविषयान् क्रमशः संक्षेपेण पश्यामः । इत्यलम् ।

शुभं भवतु ।

## चायस्तोत्रम्

**मूलकवितास्रोतः - महाजालम्**
**अनुवादः - नारायण शिराली ,  ठाणे**



श्रमालस्यमहानिद्रे चायः संहरति क्षणे ।
मुखं प्रभाते प्रक्षाल्य पीत्वा प्रमुदिता जनाः ॥

प्रियमात्रा प्रदत्तोऽयं मुखचुम्बनसदृशः ।
स्नानादनन्तरं पीतः चैतन्यं प्रददाति सः ॥

नीमयुक्तो विना दुग्धम् अरुचिः पित्तशामकः ।
शर्करया विहीनो न बाधते मधुमेहिनम् ॥

शीतज्वरं शिरःशूलं नासिकां फुर्फुरायतीम् ।
चायतृणाद्रकायुक्तो विकारान् हन्ति सत्वरम् ॥

प्राशने भोजनात् पूर्वं मन्दाग्निः पित्तशामकः ।
पाचितोऽ स्तु पुनः पुनः टॅनिन-विषकारकः ॥

स्वागतमाप्तमित्राणां विना चायं कथं भवेत् ।
समागतमपूर्वद्यौः श्रेष्ठतमममृतं भुवि ॥

## सारूप्यं खलु

**- दुर्गा कुम्टा , मुम्बई**

चार्ली-चॅप्लिनं कः न जानाति? मूकचलच्चित्राणां दिनानि आसन् ते । चार्लीमहोदयः विश्वविख्यातः तु आसीदेव तस्य बहुगुणि-व्यक्तित्वेन किन्तु लोकप्रियतायाः उच्चशिखरमपि प्राप्तमासीत् तेन । देदीप्यमानयशसा तस्य कीर्तिः मण्डिता किल ? परन्तु जनानां हृदयेषु विशेषस्थाने सः विराजितः आसीत् - अनभिषिक्तः राजा इव । एतं सर्वं विचिन्त्य एकः आयोजकः एकां स्पर्धाम् आयोजितवान् । स्पर्धायाः घोषणा जाता " सन्दृश्यतां चार्ली-चॅप्लिनः इव " ।

ओहोहो ! अनपेक्षितः भृशं सहभागः कृतः जनैः। प्रत्येकस्य प्रस्तुतीकरणं चॅप्लिनस्य वैशिष्ट्यपूर्णं चलनं गमनं हस्तचालनं मुखभावं च तस्य वेशभूषादि- सर्वं यथार्थतः आसीत् । कीदृशं साधर्म्यं ननु !! परीक्षकाः अपि विस्मिताः अभवन् । स्पर्धायाः विजेता कः इति उद्घोषणा तु करणीया एव। उत्कण्ठिताः सर्वे अधीराः भूत्वा निर्णयस्य प्रतीक्षां कुर्वन्तः आसन् ।



निर्णयस्य क्षणः तु परीक्षकाणां कृते अतीव कठिनः प्रसङ्गः धर्मसङ्कटमिव आसीत् । अतीव गहनालोचनायाः अन्ते निर्णयः घोषितः । जानन्ति वा ? चार्ली- चॅप्लिनेन अपि अस्यां स्पर्धायां सहभागः कृतः किन्तु सर्वे अनभिज्ञाः एव आसन् एतस्य विषये । प्रथमक्रमाङ्कः केन प्राप्तः इति न महत्वपूर्णं , किन्तु सर्वेषां हृदयसम्राट् - वराकः चार्ली-चॅप्लिनः सप्तमस्थानं प्राप्तवान् ।एतदेव अस्ति वा खलु सारूप्यम् ?

### उत्तराणि

**योजन-क्रीडा** (१-ए) , (२-औ) , (३-उ) , (४-ऊ) , (५-ओ), (६-ऐ) , (७-इ) , (८-आ) , (९-ई) , (१०-अ)

**सम्पादिका –** वरदा सौकूर
**पृष्ठरचना –** वन्दना बळवळ्ळी
**सम्पादकीयसमितिः –** शीला कळावर , दुर्गा कुम्टा , अर्चना काप्राडक , सुधा कार्नाड , शिल्पा मुदूर
**सम्पादकीयसाहाय्यम् –** तेजश्री बैलूर

**अभिप्रायं तथा लेखं प्रेषयितुम् इच्छुकानाङ्कृते सम्पर्कः -**
**Email id: girvanapatrika@chitrapurmath.net.in** (लेखार्थं शब्दमर्यादा-२५०)

**गीर्वाणप्रतिष्ठायाः संस्कृताध्ययनार्थं संस्कृत-सम्भाषणार्थं च जालाधारित-वर्गाः प्रचलन्ति ।**
**पञ्जीकरणाय आवेदन-पत्रस्य सम्पर्क-सूत्रम्**
**https://chitrapurmath.net/site/activities-girvanaprathistha-online-classes**

Scan QR Code
for Enquiry Form